PRINTED BOOK

THE VEDIC PATH

Quarterly Journal of Vedic, Indological
and Scientific Research
Gurukula Kangri Vishwavidyalaya,
HARDWAR

(1) सुवर्णयानंद पेज = 17, 66, 67 = 3

19.5 x 10.5 x 0.1 cm

(2) पेज - 2 विषय देवी स्तुति

15 x 11 x 0.1 cm

43

To,

(3) विषय - अनुपलब्ध - पेज - 22.6 x 11.5 x 0.1 cm.

If not delivered, please return to :
Dr. R. L. Varshney
Editor, Vedic Path
'Dreamland'
P. O. Gurukula Kangri-249 404
HARDWAR, U. P., INDIA.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कु॰
१७

(1)

निम्नगाक्षीणां न डिंडिमसितान्यपि क्षणद्वयं न तिष्ठंति घनारब्धान्यपि स्वयम् ॥ १२ ॥ पूर्वत्र स्तुतिरिह निंदा
द्वयं कश्चिदादर्शे दर्शिता इमां तुल्ययोगितां सिद्धिरिति केचिद्व्यवजहुः यदाह जयदेवः सिद्धिः ख्यातेषु
चेन्नाम कीर्त्यते तुल्यतोक्तये युवामेवेह विख्यातौ त्वं बलैर्जलधिर्जलैरिति ३ मतांतरे चात्रवदस्य
माणं दीपकमेव । वदंति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः मदेन भाति कलभः प्रतापेन महीपतिः
४ प्रस्तुताप्रस्तुतानामेकधर्मान्वयो दीपकं यथा करभनरपालयोः प्रस्तुताप्रस्तुतयोर्भानक्रियान्व
यः यथा वा मणिः शाणोल्लीढः समरविजयी हेतिदलितो मदक्षीणो नागः शरदि सरितः श्यानपु
लिनाः कलाशेषश्चंद्रः सुरतमृदिता बालवनिता तनिम्ना शोभंते गलितविभवाश्चार्थिषु नृपाः ५
अत्र प्रस्तुतानां नृपाणामप्रस्तुतानां च मण्यादीनां च शोभैकधर्मान्वयः प्रस्तुतैकनिष्ठः समानोध
र्मः प्रसंगादन्यत्रोपकरोति प्रासादगर्भमारोपितो दीपो रथ्यायामिव दीपसादृश्याद्दीपकसंज्ञा सं
ज्ञायां चेतीवार्थे कन्प्रत्ययः यद्यपि सुवर्णपुष्पितां पृथ्वीं चिन्वंति पुरुषास्त्रयः शूरश्च कृतविद्यश्च
यश्च जानाति सेवितुम् ६ इत्यत्र प्रस्तुताप्रस्तुतानां युगपद्धर्मान्वयः प्रतिभाति । मदेन भाति कल।

राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

करान्वितानि समुद्वहंति स्फुटपाटलत्वम् विकस्वराण्यर्ककराभिमर्शाद्दिनानि पद्मानि च वृद्धिमी।
युः ९७ नागेंद्रहस्तास्त्वचि कर्कशत्वादेकांतशैत्यात्कदलीविशेषाः लब्ध्वापि लोके परिणाहिरू
पं जातास्त्वदूर्वोरुपमानबाह्याः ९८ अत्र ग्रीष्मवर्णनेन दीयत्वेन प्रस्तुतानां दिनानां पद्मानां च एक
क्रियान्वयः ऊरुवर्णनेऽप्रस्तुतानां करिकराणां कदली[illegible]नां चैकगुणान्वयः हिताहितेवृत्तितौ
ल्यमपरात्तुल्ययोगिता॥ प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया ९९ अत्र हिताहितयोर्मित्रशा
त्रवयोरुत्कृष्टभूतिदानस्य पराभवदानस्य च श्लेषेणाभेदाध्यवसाया वृत्तितौल्यम् यथा वा
यश्च निंवं परशुना यश्चैनं मधुसर्पिषा यश्चैनं गंधमाल्याद्यैः सर्वस्य कटुरेव सा॥ १०० अत्रछिनत्ति
सिंचति अर्चति इत्यस्याध्याहारे वाक्यानि पूरणीयानि पूर्वोदाहरणं राज्ञः स्तुतिपर्यवसायि इदं
निंदापर्यवसायीति भेदः इयं सरस्वतीकंठाभरणोक्तातुल्ययोगिता लोकपालो यमः पाशी श्रीदः
शक्रो भवानपि १०१ अत्र वर्णनीयो राजा पाशकादिभिर्लोकपालत्वेन समीकृतः यथा वा संगता।
गुणोत्कृष्टैः समीकृत्य वचोन्यातुल्य
योगिता २४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उत्तरम् यत्रासौ वेतसी पांथ तत्रेयं सुतरा सरित् ११ सरित्तरणमार्गं पृष्टं प्रति तं कामयमानाया
उत्तरमिदं वेतसीकुंजे स्वाध्यायमित्याकूतं ग्रामेस्मिन्प्रस्तरप्राये न किंचित्पांथ विद्यते पयोध
रोन्नतिं दृष्ट्वा वस्तुमिच्छसि चेद्वस १२ आस्तरणादिकमर्थयमानं पांथं प्रत्युक्तिरियम् स्तनो
न्नतिं दृष्ट्वा रंतुमिच्छसि चेद्वस अविदग्धजनप्रायेऽस्मिन्ग्रामे कश्चिदवगमिष्यतीत्यनोदृ
शां प्रतिबंधकं किंचिदपिनास्तीति हृदयम् इदमुत्तरप्रश्नस्योत्तरस्योदाहरणं निबद्धा
मुत्तरं यथा· कुशलं तस्या जीवति कुशलं पृच्छामि जीवतीत्युक्तम् पुनरपि तद्देव कथयय।
सि मृतां न कथयामि या श्वसितीति १३ ईर्ष्यमानानंतरतप्राया नायिकायाः सखीमागतां
प्रति कुशलमिति तदभिप्रायः अन्यत्स्पष्टमन्यदुत्तरमिति नायिका । यकस्य पुनः कुशलं
पृच्छामीति प्रश्नः पृष्टस्योत्तरमुक्तमित्याभिप्रायेणा जीवतीत्युक्तमिति सख्या वचनं स।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वीयवचनोद्घाटनार्थं पुनरपि न देव कथयसीति नायकस्याक्षेपः मृतां न कथयामि याम्यवसि।
ति इति स्वाभिप्रायोद्घाटनं मरणोस्मि तितस्याः कुशलं भवेति मदागमनसमयेपि श्वासेषु सं
वरत्सु कथं तां मृतां कथयेयमित्यभिप्रायः प्रश्नोत्तरान्तरेऽभिन्नमुत्तरं चित्रमुच्यते के
दारपोषणरताः के खेटाः किं चलं वयः १४ अत्र के दारपोषणरता इति प्रश्नाभिन्नमुत्तरं
के खेटाः किं चलं वयमिति प्रश्नत्रयस्यावयवद्वयेनैकमुत्तरं उदाहरणान्तराणि विदग्धमुखमंड
ने दृष्ट्वानि सूक्ष्मं पराशयाभिलेनरसाकूतचेष्टितम् मयि पश्यति सा केशैः सीमंतम
णिमावृणोत् १५ कान्तकस्यावलोकनेन संकेतकालप्रश्नभावं ज्ञात्वानवत्याश्लेषेयं अस्तं
गते सूर्ये संकेतकाल इत्याकूतम् यथा संकेतकालमनसं विदं ज्ञात्वा विदग्धया अत्रा।
सान्नेत्रार्पिता कृतं लीलापद्मं निमीलितम् १६ पिहितं परवृत्तांतं ज्ञातं साकूतचेष्टितं प्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

येनकृतागतेप्रातः कांतानतल्पमकल्पयत् ८ रज्ञोसपत्नीगृहे श्रांतोऽसि इतितेन तल्पकल्पनमा
कृतम् वक्त्रं स्वेदद्विंदुप्रवंधैर्दृष्ट्वाभिन्नं कुंकुमं कापि कंठे पुंस्त्वं तन्व्या व्यंजयंतीवयस्या।
स्मित्वापाणौखड्गलेखांलिलेख ९ अत्र स्वेदानुमितं पुरुषायितं पुरुषोचितखड्गले
खनेन प्रकाशितम् व्याजोक्तिरन्यहेतूक्त्याय दाकारस्य गोपनम् सखिपश्यगृहारामप।
रागैरस्मिधूसरा १९ अत्र चौर्यरतेकृतम् एष्टलोठनेन लग्नधूलीजालस्य गोपनम् क
स्य वा न भवेद्रोषः प्रियायाः सव्रणाधरे सभृंगं पद्ममाघ्राली वारितापि समयाधुना २० उपप
तिनाखंडिताधरयानायिकायाः सकाशमागच्छंतं प्रियमपश्यंत्यैव सख्यानायिकां प्रति।
हितोपदेशव्याजेन नतं प्रति नायिकाऽपराधगोपनम् छेकापन्हुतेरस्याश्चायं विशेषः यत्त
स्यां वचनस्यान्यथानयनेनापन्हवः अस्यामाकारस्य हेत्वंतरवर्णनेन गोपनमितिलत्त

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कु०
६७

रोलम्बनाम्नि चोक्तिग्रहणमाकारस्य गोपनार्थहेतुत्वं तरप्रत्यायकव्यापारमात्रोपलक्षणम् त
तश्च आयांतमालोक्य हरिं प्रतोल्यामाल्याः पुरस्तादनुरागमेषा रोमांचकंपादिभिरुच्य
मानं भामा [illegible] गूहप्रणाममत्यथैनम् २१ इत्यत्रापि व्याजोक्तिरेव तत्रानुरागकृतस्य रो
मांचाद्याकारस्य भक्तिरूपहेतुत्वं तरप्रत्यायकेन प्रणामेन गोपनं कृतम् सूक्ष्मपिहिताल
कारयोरपि चेष्टितग्रहणमुक्तिसाधारणव्यापारमात्रोपलक्षणं तत्र नलिनीदलेवला
कामरकतपात्र इव दृश्यते शुक्तिः इति मम संकेतमु विज्ञात्वा भावं तदब्रवीदालीम्
२२ इत्यादिष्वपि सूक्ष्मालंकारः प्रसरति अत्र श्लोके तावत्किमावयोः संकेतस्थानम् ।
विधत्तेति प्रश्नाशयं सूचयति कामुके तदभिज्ञया विदग्धया तदा सखीं प्रति साकूतमु
क्तमिति सूक्ष्मालंकारो भवति यतोत्र वलाकायां मरकतपात्रप्रतिष्ठितशुक्त्युपमया ।
तस्याति निश्चलत्वेनाश्वस्तत्वं तेन तत्प्रदेशस्य निर्जनत्वं तेनावयोः संकेतस्थानमिति का

रामः
६७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

2

१ ॐश्रीगणेशायनमः देव्युवाच नमो देवी जगद्धा
त्रि जगत्त्रयमहारणे महेश्वर महाशक्ते दैत्य
द्रुमकुठारिके १ त्रैलोक्यव्यापिनि शिवे शंखचक्र
गदाधरे स्वाहाकारव्ययहस्ताग्रे नमो विष्णुस्व
रूपिणि २ हंसयाने नमस्तुभ्यं सर्वसृष्टिविधा
यिनि प्राचां वाचां जन्मभूमे चतुराननरूपिणि
३ त्वमैन्द्री त्वं च कौमारी वायवी त्वं समगुणा त्वं
वाराही नैरृती त्वं च त्वमैशी त्वं च पावकी ४ ब्रह्म
ककौमुदी त्वं वै सौरी नारसिंहरूपिणि सर्वदेव
मयी शक्तिस्त्वमेव परमेश्वरी ५ त्वं गौरी त्वं च
सावित्री त्वं गायत्री त्वं सरस्वती प्रकृतिस्त्वं मति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१

ऽपिचत्वमहंकृतिरूपिणी ६ ततः स्थूलरूपिणी त्वं
वै त्वं सर्वभूतरूपिणी पंचतन्मात्ररूपा त्वं महा
भूतात्मिके शिवे ७ शब्दादिरूपिणी त्वं वैकार
त्मिका णात्तु महात्मतत्त्वस्मोऽङ्कचोतं देवी ब्रह्मा गेन
त्वमेव हि ८ त्वं परासि महादेवी परापरस्वरू
पिणी सर्वरूपा त्वमीशानी त्वमरूपासि सर्वगे ९
त्वंहिच्छक्तिर्महामाये त्वं स्वाहा त्वं स्वधामृते हव
रू व्यगोचरस्वरूपा त्वं त्वमेव सगुणात्मिका १० सर्व
मेव मया त्वं देवेश त्वमतत्त्वसमन्वगा चतुर्वर्गात्मि
का त्वं वै चतुर्वर्गफलोदये ११ त्वत्तः सर्वमि
दं विश्वं त्वत्तः सर्वं जगन्निधे पदस्थावरदं सच

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्यालं सर्वं सकृपतः तत्रत्वं शालेकेरूपे णाकेंश्चित्न
लहुतेकार्येत्र १२ मातस्त्वया घविनिहत्ताम हा
सवेंभूरूगं निसर्गविघु धार्पितदैत्यसेन्यमत्रा
ताःसादेविसततं नमामा घारण्यतत्वतोपरःकडेह
यं प्रारणात्रहेम १३ त्रैलोकेनत्र एव भूनधान्यहा
मोह्नमाजस्त्वेगुत्रपीत्रसकलत्रेसुभिन्नवं ततः ते
योऽप्रशामूद्रकरावदोतं विषभवेन्नवासिपेन
सहस्त्वमीश १४ त्वन्दाक्लैवस्यापेजनैनविपती
लेप्राःक्लेशःकृवानुभवातेनतिकृत्स्नुपुसत्वना
मसंस्मृतिर्यथासफलापुर्वोकृमपःपुनर्ज्योति
रिहमेसुरारिपति १५ त्वयैवं पद्दृच समरे सहि
त्रि दुर्गदैत्यसत्यदृश्यापातमध्येगम्यसुधानि।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(1)

प० ८

जभस्तुतिंह्नोमरुद्भिरस्यात् दिवायावभिरस्यात् प्रातघा निरसि प्रातसनिं
नाकुवींविद-मागमयउष-म्राजभस्तुरिंह्नोमरुद्भिरस्यात् सायंवावभि
रस्यात् ..हसमनिरसि सहस्रसनिं माकुवींविद-मागमयेति मंत्रेण तता
दधितिलान्वा प्राश्याचम्य न खलो माद्दीन् कंदयि ता-चम्य प्रादे प्रामितोडुं
बरकाष्ठे न दंतधावनं ओं अन्नाद्याय व्यूहध्वं सोमो राजायमागमत्
समेमुखंप्रमार्क्ष्यते यशसा च भगेन चेति मंत्रेण ततो दंतकाष्ठं परित्यज्या
चम्य मुखं गंधिद्रव्येणोद्वर्तनानंतरं स्नात्वा शिराचम्य चंदनकुंकुमादिना
नासिकायां मुखे स्थालेपनं ओं प्राणापानौ मे तर्पय ओं चक्षुर्मे तर्पय ओं
श्रोत्रं मे तर्पयेति मंत्रेण ततो दक्षिणाभिमुखः पातितवामजानुः कृताप राम

८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वमभ्युषिंचेत्तं यद्वा तद्दक्षिणाय स्तः ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातु
न महे रणाय चक्षसे १ ॐ यो वः शिवतमो रसः तस्य भाजयतेह नः उशतीरिव मा
तरः २ ॐ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः ३ ततो
वशिष्ठकलशात्रितयजलं तथैव प्रत्येके गृहीत्वा तस्मिं प्रत्येकमभिषिंचति
६ ततो मेखलामोचनं शिरोभागेन तत्र मंत्रः ॐ उदुत्तमं वरुणपाशमस्मदवा
धमं वि मध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो दितये स्याम १ त्या ६
दंडकृष्णाजिने तत्स्मिं मौनि धायान्यद्वस्त्रं परिधायोत्तरीयं कृत्वा चमस्य
वद्धांजलिरादित्यमुपतिष्ठेत ॐ उद्यन्भ्राजभृष्णुरिंद्रो मरुद्भिरस्थात् प्रा
तर्यावभिरस्थात् दशसनिरसि दशसनिं माऽविविदन्मा गमय उद्यन्भ्रा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सव्योद्विगुणभुग्नकुशत्रयतिलजलान्यादायास्तृतकुशोपरि पितृंस्तर्पयेत् ओं
पितरः शुन्धध्वमिति मंत्रेण ततश्चाचम्यानुलिप्य प्रजपेत् ओं सुचक्षा अहमक्षि
भ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम् इति ततोऽहतवस्त्रपरि
धानं ओं परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि
२ शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये इति मंत्रेण ततो यज्ञोपवीतपरिधा
नं ओं यज्ञोपवीतं परमं पवित्रं इति मंत्रेण ततश्चाचमनं अथोत्तरीयं ओं य
शसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती यशो भगश्च मा विदद्यशो मा प्र
तिपद्यतामिति मंत्रेण ततः पुष्पग्रहणं ओं या आहरज्जमदग्निः श्रद्धा
यै मेधायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन चेति मंत्रेण

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

५०
१० ततः पुष्पमालापरिधानं ओं यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु तेन संग्र
थिताः सुमनस आबध्नामि यशो मयि । अथोष्णीषेणापिधाते वेष्टनं ओं युवा सु
वासाः परिवीत आगादिति मेखलावेष्टने शाङ्खिलिखितमन्त्रेण ततः कुण्डले प
रिदधाति ओं अलङ्करणमसि भूयोऽलङ्करणं भूयात् । ततोऽञ्जनं ओं वृत्र
स्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि । तत आदर्शे आत्मदर्शनं ओं
रोचिष्णुरसीति मन्त्रेण ततश्छत्रग्रहणं बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्धे
हि तेजसो यशसो मामन्तर्धेहि । ततः पश्चांउपानहौ प्रतिमुञ्चति ओं प्रति
ष्ठे स्थो विश्वतो मा पातं । ततो वैणवं दण्डधारणं ओं विश्वाभ्यो मा नाष्ट्राभ्यः
परि पाहि सर्वतः । तत आचार्याय वरं दक्षिणां दद्यात् ततः ओं मूर्द्धानम्भि राम
१०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA